International Journal of Sanskrit Research 2022; 8(4): 166-171

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 166-171
© 2022 IJSR
www.anantaajournal.com
Received: 29-04-2022
Accepted: 17-06-2022

**पापिया राणी पुरिष्टी**
छात्री, रथिपुरः रथिपुरः, घाटालः, पश्चिममेदिनीपुरः पश्चिमबङ्गः, भारत

**Corresponding Author:**
**पापिया राणी पुरिष्टी**
छात्री, रथिपुरः रथिपुरः, घाटालः, पश्चिममेदिनीपुरः पश्चिमबङ्गः, भारत

# कालिदासस्य कृतिषु मानवाधिकाराः

## पापिया राणी पुरिष्टी

**सारांशः**
कविः समाजस्थानां मनुष्यानां हृदयोल्लासार्थं साहित्यं सृजति । समाजस्य कृते साहित्यं लिखितम् अस्ति । साधारणजनानां आवेगानुभूतिमाधारीकृत्य प्राचीनवैदिकसाहित्यमाधुनिकसाहित्यं वा रचितं भवति। किं जातम्, किं भवति किं वा भवितुमर्हति, तत् कविनां काव्ये प्रतिबिम्बितमस्ति। साहित्ये केवलं चरित्रविश्लेषणं रसास्वादनं वा न भवति, सामाजिकमूल्यानि, सामाजिकाधिकाराः तथा च सर्वाणि सामाजिकानि आग्रहाणि साहित्येन व्यक्तानि भवन्ति। महाकविना कालिदासेन स्वकाव्येषु मानवाधिकारः कथं प्रतिबिम्बितो भवति इति चर्चा अस्मिन् निबन्धे कृता । ते सर्वे अधिकाराः तत्कालीनजनैः भुक्ताः सन्ति, अद्यत्वे जनाः च तान् उपभोगयन्ति एव । अतः प्राचीनकाले अधुना च जनाः कथं अधिकाराः उपभोग्यन्ते, तेषां चर्चा कालिदासस्य काव्ये कथं भवति इत्यस्य दिग्दर्शन्मात्रं वर्णितमस्त्यत्र ।

**प्रमुखशब्दाः** कालिदासः, रघुवंशम्, ऋतुसंहारम्, अभिज्ञानशकुन्तलम्, मेघदूतम्, दुष्यन्तः, दिलीपः

## प्रस्तावना

प्राचीनकाले वर्तमानकाले च प्राणिनः स्वस्य अस्तित्वार्थं निरन्तरं योधयितुं प्रवृत्ताः सन्ति । सः युद्धः प्रकृत्या सह समाजेन सह वा अभवत्। मनुष्यः ईश्वरस्य उत्तमः सृष्टिः अस्ति। मनुष्या बुद्ध्या अन्येभ्यः प्राणिनः अपेक्षया अग्रे भवन्ति। प्राचीनकाले राजतन्त्रे सक्षमशासकाभावेन अराजकतायाः निर्माणं जातम् । सर्वदा सर्वेषु प्रसङ्गेषु बलिष्ठैः दुर्बलाः क्रूरतया पीडिताः। इयं व्यवस्था वर्तमानसमयेऽपि न विरला। ड. बी.आर.अम्बेडकरः १९४९ तमे वर्षे समाजे जनानां अधिकारानां स्वतन्त्रतायाः च कृते संविधानं लिखितवान् ।भारतीयसंविधानस्य तृतीयभागस्य अनुच्छेदः १२ तः ३५ पर्यन्तं मौलिकाधिकाराणां विस्तृतविमर्शः अस्ति । सामान्यतया नागरिकानां अधिकारेषु ये व्यक्तित्वविकाशाय अत्यावश्यकाः सन्ति ते मौलिकाः अधिकाराः इति उच्यन्ते । भारतीयसंविधाने कुलम् ६ मौलिकाः अधिकाराः सन्ति । परन्तु संविधानलेखनात् बहुपूर्वं प्राचीनसंस्कृतसाहित्यस्य विविधकाव्येषु एते सर्वे नियमाः दृश्यन्ते इति आश्चर्यम्। एतेन एषः प्रश्नः उत्पद्यते यत् किं वास्तवमेव एतेषां सर्वेषां ग्रन्थानां संविधानलेखने भूमिका अस्ति ? अपि च तत्कालीनचिन्तनेन सह वर्तमानचिन्तनसामाजिकव्यवस्थायाः च बहुधा साम्यम् अस्ति ।सम्प्रति मानवजीवनस्य प्रत्येकक्षेत्रे सामाजिकव्यवस्थया राजनैतिकव्यवस्थया च सह सर्वेषु विषयेषु संस्कृतसाहित्यस्य प्रभावः वर्तते | एतादृशः एकः संस्कृतसाहित्यप्रवर्तकः कालिदासः अस्ति यः स्वलेखनेषु मानवाधिकारस्य स्थानं यथा दत्तवान् तथा अधः अहं बर्णयामि।

मौलिकाधिकाराः
१) समानतायाः अधिकारः (अनुच्छेदः १४-१८)
२) स्वतन्त्रतायाः अधिकारः (अनुच्छेदः १९-२२)
३) शोषणविरोध्यधिकारः (अनुच्छेद २३-२४)
४) धार्मिकस्वतन्त्रतायाः अधिकारः (अनुच्छेदः २५-२६)
५) संस्कृतेः शैक्षिकस्य चाधिकारः (अनुच्छेद २९-३०)
महाकबेः कालिदासस्य रचनासु उपर्युक्ताः मौलिकाधिकाराः कीदृशाः प्रतिविम्विताः सन्ति तस्मात् किञ्चिदालोचितव्यामधुना ।

**महाकबेः कालिदासस्य कृतयः**

संस्कृतसाहित्ये महाकबिः कालिदासः श्रेष्ठासने समादृतः अस्ति । संस्कृतसाहित्यागारस्य पूर्णतया अस्य कवेः कृतिसप्तकमतीव गुरुत्वपूर्णम् । तेषु कृतिषु 'मेघदूतम्', 'ऋतुसंहारम्'इति खण्डकाव्यद्वयम्, 'कुमारसम्भवम्' 'रघुवंशम्'इति महाकव्यद्वयम् तथा च 'अभिज्ञानशकुन्तलम्', 'विक्रमोर्वशीयम्', 'मालविकाग्निमित्रम्'इति नाटकत्रयं संस्कृतसाहित्ये श्लघ्यासनाधिष्ठितमस्त्यावहमानकालादद्यावधिः। एषु काव्येषु मानवाधिकाराः प्रत्यक्षरूपेण परोक्षरूपेण वा कीदृशाः प्रतिविम्विताः सन्ति तदालोचयितुं चेष्टयामि।

**१) मेघदूतम् :**

क) कैलासाधिपतेः शिवस्य नित्याराधनाय मानससरोबरे स्वर्णपद्मरक्षणार्थं कुबेरेण यक्षः नियुक्तो भवतीति अस्य खण्डकाव्यस्य प्रारम्भे एव दृश्यते। परन्तु प्रियासान्निध्ये निरतस्य तस्य यक्षस्य अनवधानतया महेन्द्रस्य गजवृन्देन तानि कमलानि विनष्टानि सन्ति। अनेन कारणेन स यक्षः कुवेरेण वर्षभोग्यस्य प्रियाविरहस्य शापो प्राप्तो भवति। यक्षः तस्य कर्तव्यपालाद्भ्रष्टो भवति। यतः कमलानां विनष्टाय यक्ष एव कारणं तर्हि तं शास्तिप्रदानं कुवेरस्याधिकारः। एवञ्च यतः कुवेरः स्वयमेव उत्तराधिपतिः तर्हि तेन यक्षः यथा शास्तिप्राप्तो भवति तद्वत् यक्षश्चापि आत्मानं दोषयुक्त इति स्वीकरोति।

**विश्लेषणम्:** भारतीयसंविधानस्य ३२संख्यके अनुच्छेदे दृश्यते यत्, सर्वकारेण केनापि मनुष्येन वा कस्याप्यधिकारः हृतो न भविष्यति। यदि ईदृशमाचरणं भवति तर्हि न्यायालये यथोपयुक्तेन विचारेण अभियुक्तस्य शास्तिविधानं भविष्यति।
अत्र लक्ष्यणीयं यत्, दायित्वपालनं यथा दायित्वप्राप्तस्य सांविधानिकं कर्त्यव्यं तथैव कर्तव्यभ्रष्टस्य शास्तिविधानमपि नियोगकारिणः अधिकारः।द्वयमेव मानवाधिकारम्। अनेन कारणेण प्रभुना कुवेरेण यक्षः भारतीयसंविधानसम्मतः शास्तिप्राप्तो भवति, यतः कर्तव्ये नियुक्तेऽपि यक्षः तस्य दायित्वपालनात् विच्युतो भवति। अतः कर्तव्यकरणाय वचनदाने कृते त्वद्वचनमवश्यमेव सम्पूर्णीकरणं कर्तव्यम् इति भारतीयसंविधानस्य निर्देशः यत्तु पालनीयम्।

ख) दूरे रामागिर्याश्रमे यक्षः निर्वासितो भवति। तस्य प्रियासन्निकटे सन्देशप्रेरणार्थं तेन यक्षेण अचेतनः मेघः दूतरूपेण नियुक्तो भवति। कालिदासस्य रचनासु अचेतनमपि चेतनवत् व्यवहारं करोति। रामगिरितः कल्पलोकस्य अलकापुर्यवधिः मेघस्य गमनमार्गः। अर्थात् भारतस्य दक्षिणादुत्तरपर्यन्तम्। अपि च कस्यापि अनुमतिं विनैव मेघः यथेच्छरूपेण विचरयतीति अस्मिन्काव्ये दृश्यते।

**विश्लेषणम्:** सर्वे भारतीयनागरिकाः भारतस्य आभ्यन्तरीणे भूखण्डे निर्वाधे विचरणं कर्तुं समर्थाः भविष्यन्तीति संविधानस्य १९तः २२शे अनुच्छेदे लिखिता अस्ति। अतः अस्य संविधानमनुसृत्य कलिदासेनापि मेघः भारतस्य आभ्यन्तरीणे भूखण्डे गन्तुमनुमतिप्राप्तो भवति।

ग) प्रियाविरहे नियतदग्धः यक्षः तस्य अचेतनस्य मेघस्य समीपे सर्वं व्यक्तं करोति मेघश्च ततसर्वं दूतरूपेण यक्षप्रियायाः समीपे निवेदयति। अर्थात् अत्र दृश्यते यत्, यक्षः मेघश्च द्वयमेव स्वीयमनोवासना निःशङ्कचित्ते प्रकाशयति। अतः अत्र द्वयस्य वाक्स्वाधीनता सर्वैव सुरक्षिता कालिदासेन ।

**विश्लेषणम्:** भारतीयसंविधानस्य १९तः २२अनुच्छेदे सर्वेषां कृते वाक्स्वाधीनता उल्लिखिता। अर्थात् प्रत्येकस्य भारतीयनागरिकस्य स्वाभिमतं प्रकशयितुमधिकारः अस्मिन् संविधाने उल्लिखितः अस्ति यच्च पूर्वमेव कालिदासेन उल्लिखितः।

**२) ऋतुसंहारम् :**

'ऋतुसंहारम्' इति नामकरणात् एतज्ज्ञायते यत्, अस्मिन् काव्ये ऋतुविषयकमालोचनमस्ति। यथार्थमेतत्, अस्मिन्काव्ये षट्तूणां क्रमिकावर्तनं ऋतूणामागमनाच्च प्रकृतिः तथा प्रकृत्याश्रये पालिताः जीवाःकीदृशया सज्जया सज्जिताः भवन्ति तत् सर्वं वर्ण्यते कविना अत्र। कलिदासेन ऋतुविषयकं यदालोचितं समासेन तदत्र मया उल्लिखितं ।

क) **ग्रीष्मवर्णनानामकः प्रथमः सर्गः** – ग्रीष्मे सुर्यः रुद्रमूर्तिः भवति, जलाशयाः मलिनाः शुष्कप्रायाश्च, अपराह्णः इदृशः रमनीयः यत्र कामदेवस्य प्रभावोऽपि स्तिमितास्ति। सूर्यस्य तेजोद्दीप्तकिरणैः प्राणिनां स्वकीयतेजः हृतः भवति। ग्रीष्मस्य दावदाहेन उत्तप्तः नतमुखिसर्पः मार्गस्य तप्तधूलिकनाभिः दग्धीभुत्वा मयूरस्य अधः आश्रयग्रहणं करोति। अग्निसदृशस्य सूर्यस्य तेजैः मयूरस्य शरीरमपि अचैतन्यम्। एतदर्थं उपस्थितः भोग्यसर्पऽपि तेन न निहतः। महता तृष्णायां पशुराजस्य पराक्रमः स्थगितः, अतः सः समीपस्थं गजं न मारितः। मण्डुकः सूर्यकिरणैः उष्णः

सन् कुण्डात् बहिः उत्प्लुत्य नागस्य फ़णछायायां आश्रयं गृहीतः।

ख) **प्रावृडिति द्वितीयसर्गः –** ग्रीष्मकालस्य अनन्तरं प्रावृट् आगच्छति। प्रखरतपेन उष्णधरणीं शीतलायितुं आकाशे मेघाः प्रसृताः भवन्ति। तस्मात् मेघात् जलबिन्दवः पतन्ति बिन्दुरूपेण । ये जलाशयाः ग्रीष्मकाले शुष्काः आसन्, ते पुनः वर्षासु पूर्णाः भवन्ति । प्रत्येकं तापक्लिष्टः पशुः वर्षासु पुनः जीवति । मेघान् आह्वयितुं वलाकाः शुक्लपक्षं पङ्क्तिं कृत्वा आकाशे माला इव प्रसारयन्ति स्म । मेघं दृष्ट्वा कान्ता-कान्तयोः हृदयं कामपूर्णं भवति, ततश्च ते रात्रौ क्रीडासु मत्ताः भवन्ति। क्षीणाः वनस्पतयः वर्षाजलेन पुनः हरिताः भवन्ति । भूमिः कृषियोग्या भवति। केकं कृत्वा मयूराः सुखेन नृत्यन्ति । कविः स्वकाव्ये वृष्टिधारां नृपेण सह, मेघं मत्तगजेन सह, मेघनादं मर्दलशव्देन च सह तुल्यते ।तस्य मर्दलस्य लयानुरूपं धरित्री उत्सवालिङ्गने भागं ग्रहीतुं हरितवस्त्रं धारयति।

ग) **शरद्वर्णनानामकः तृतीयसर्गः** – प्रावृडनन्तरं शरदऋतुः दृश्यते । अस्मिन् समये प्रकृतिः पुनः अद्वितीयशैल्या परिधानं करोति । क्षेत्रे क्षेत्रे काशपुष्पसमारोहः दृश्यते, तडागाः पद्मैः पूरिताः भवन्ति, क्वचिद् नीलगगने दृश्यन्ते कार्पासादिरूपाः मेघाः । शिउलिपुषपस्य गन्धः समन्ततः प्रसृतः भवति । नवप्रस्फुटितानि श्वेतकाशपुष्पाणि शरदवस्त्रमिव भवन्ति। प्रदोषसमये तृणाग्रेषु शिशिरबिन्दवः दृश्यन्ते । अस्मिन् काले यथा सूर्योदये पद्मं पुष्पितं भवति तथा रात्रौ कुमुदिनी पुष्पिता भुत्वा चन्द्रेण सह मिलिता भवति। शुक्लवस्त्रधारकः रमणीयलावण्ययुक्तः शरदऋतुः प्रकृतिं नान्दनिकशोभया शोभते ।

घ) **हेमन्तवर्णनानामकः चतुर्थसर्गः** - ऋतूणां स्वकीयं लक्षणं भवति तेन लक्षणेन ऋतवः प्रकृतिमलंकुर्वन्ति। हेमन्ते अनुष्णाशीता प्रकृतिः राजते। प्रातः सायं च प्रकृतिः शीतलया कुज्झटीकया नीहारकम्बलेन च आवृता भवति। शरत्काले प्रफुल्लितानि पद्मानि शिशिरारम्भेण क्षीणानि भवन्ति, शालिधान्यक्षेत्राणि पक्वानि भवन्ति, लोध्रपुष्पानि प्रस्फुटितानि भवन्ति,शश्यागाराः पूर्णाः भवन्ति नवीनशष्यैः। एतदर्थं कृषकाः नवान्नोत्सवं पालयन्ति।

ङ) **शिशिरवर्णनानामकः पञ्चमः सर्गः –** हेमन्तस्य अनन्तरं शिशिरः आगच्छति। ग्रीष्मकाले यस्य सूर्यस्य रश्मयः प्राणिनां दुःसहाः भवन्ति स्म, ते शिशिरे स्वस्तिदायकाः भवन्ति । अतः जनाः स्वगृहस्य शिशिरात् रक्षार्थं द्वारं पिहित्वा तिष्ठन्ति। अस्मिन् समये परिवेशः श्वेतेन हिमस्तरेन आवृतः भवति, मार्गाः कुज्झटिकया अस्पष्टः भवति, जनाः शीतलात् नीहारात् रक्षणार्थं स्थूलानि वस्त्राणि धारयन्ति,पत्रमोचनात् वृक्षाः श्रीहीनाः दृश्यन्ते, सायं परितः मौनमस्ति, युवत्यः पुरुषाणां समीपे उपभोग्याः भवन्ति, उष्णालिङ्गनेन च शीतं वशीकृत्वा परस्परं रमयन्ति ।

च) **वसन्तवर्णनानामकः षष्ठसर्गः –** वसन्तः ऋतुराजेति आख्यायते। षट्सु ऋतुषु वसन्त एव अतीव रमणीयः। अस्मिन् समये वृक्षाः हरितवर्णेन नवपत्रैः अलङ्कृताः भवन्ति, अग्निसन्निभपलाशानां कृष्णचूडानाञ्च रक्तिमाभया प्रकृतिः रञ्जिता भवति, श्रवनेन्द्रियानि सुखकराणि भवन्ति कोकिलानां कुजनैः, मलयसमीरणेन मिलनपियासिनः मिलनाकाङ्क्षायाः कामोन्मत्ताः भवन्ति। वसन्ते प्रकृतिः तथा तत्रस्थाः जीवाः एकात्मत्वमनुभूयन्ते। आम्रमञ्जरी,भ्रमरकुलः,पलाशपुष्पं, निष्कलङ्कितः चन्द्रः, मलयसमीरणं पिककूजनञ्च वसन्तस्य वरवैचित्र्यम्।

**विष्लेशणम्:** क्रमान्वयेन प्रकृत्यां षट्तवः आवर्तिताः भवन्ति एतद्दृष्ट्वा ऋतून् चरित्ररूपेण कल्पितुं शक्यते। एते ऋतुपात्राः प्रत्येकं स्वस्वधर्मं निर्वाहयन् स्वतन्त्रतया विकसिताः सन्ति |ग्रीष्मस्य धर्मः तीव्रतापविकिरणम्, वर्षायाः धर्मः जलप्रदानम्, शरद-शिशिरयोः प्रकृतेः शान्तिः, शीते शैत्य-प्रवाहाः वसन्त-ऋतौ न शीत नोष्ण-वायुः।चक्राकारेण प्रत्येकं ऋतुः विशिष्टसमये स्वस्य वर्चस्वं धारयति । कालिदासस्य वर्णनेन ज्ञायते यत् कश्चित् ऋतुः कदापि इतरे ऋतुचक्रे बाधां न जनयति स्म ।यद्यपि सर्वत्र षट् ऋतवः वर्णिताः सन्ति तथापि सम्प्रति ऋतुचतुष्टयमुपलभ्यते, यथा - ग्रीष्मः, वर्षा, शरत्, शिशिरश्च ।अयं ऋतुचतुष्टयं ब्राह्मण-क्षत्रियादिवर्णचतुष्टयेन सह कल्पयितुं शक्यते। एतेषु ऋतुषु इव भारतसंविधानमपि चलति। यथा प्रत्येकं ऋतुः निश्चितकालचक्रस्य अन्तः एव निरुद्धः सन्, स्वकार्यं करोति, तथैव भारतवर्षऽपि एकः सार्वभौमः, धर्मनिरपेक्षः, लोकतान्त्रिकः देशः, यत्र सर्वेषां धर्माणां सर्वजातीयानां च जनानां समास्तित्वं दृश्यते। यथा प्रत्येकं ऋतुः स्वविशिष्टतया प्रकृत्यां वैचित्र्यमानयति, तथैव भारते अपि सर्वे स्वधर्मम् आचर्य्य, जातिभेदञ्चाग्राह्य एकत्र जीवनं यापयन्ति। भारतीयसंविधानस्य अनुच्छेदः १४ तः १८ पर्यन्तम् उक्तं यत्, जाति,धर्मः, लिंगं, भाषा, राज्यं च इति आधारेण कस्यापि नागरिकस्य विरुद्धं भेदभावः न करणीयः ।

### ३) रघुवंशम् :

महाकवेः कालिदासस्य 'रघुवंशम्' इति महाकाव्ये सूर्यवंशीयानां २९संख्यकानां राजानां काहिनी वर्णिता भवति। तत्र प्रथमो नृपः वैवस्वतः मनुः अन्तिमश्चाग्निवर्णः। सूर्यवंशीयाः नृपाः आजन्मशुद्धाः। ते शैशवे विद्याभ्यासम्, यौवने गर्हस्थ्यजीवनम्,वार्द्धक्ये मुनिवृत्तिः अन्तिमे च योगभ्यासेन देहत्यागमकुर्वन्। एतदुक्तं कविना ईदृशम् –

"शैशवेऽभ्यस्थ विद्यानाम् यौवने विषयैषिणाम् ।
वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्" ॥ (रघुवंशम् श्लोकः – १/८)

तत्कालीने समयेऽपि शैशवे सर्वे विद्याचर्चायां रताः आसन्। अस्मिन्काले चतुराश्रमव्यवस्था बहुधा प्रचलिताऽस्ति। वैदिकयुगादेव गुरुकुलप्रथा प्रचलितासीत्। गुरुगृहे अवैतनिकपद्धत्यां राजपुत्राः साधारणवालकाश्च सर्वे एकत्रैव विद्याभ्यासमकुर्वन्। तस्मिन् कालेऽपि अध्ययनकाले कोऽपि परिश्रमं कर्तुं वा भयङ्करं कार्यं कर्तुं वा बाध्यः नासीत् । एषा व्यवस्था सम्प्रति प्रत्येकस्य भारतीयनागरिकस्य मौलिकाधिकारस्य अनुरूपं वर्तते। भारतीयसंविधानस्य अनुच्छेदः २३ तः २४ पर्यन्तं शोषणविरुद्धः अधिकारः अस्ति । अत्र उक्तं यत्, चतुर्दशवर्षेभ्यः न्यूनः कोऽपि बालकः कस्मिन् अपि यन्त्रशालायां, आकरे, कस्मिन् अपि भयङ्करे कार्ये वा नियोजितः भवेत् । अयं बालशिक्षाकालः । अतः सः तस्मात् अधिकारात् वंचितुं न शक्नोति। रघुवंशकाव्ये उक्तं यत् महाराज दिलीपः स्वप्रजानां हिताय करसंग्रहं करोति स्म । प्राचीनकाले राजानः करसंग्रहं कुर्वन्ति स्म, परन्तु कविकाव्ये वर्णितस्य राज्ञः करसंग्रहे भेदः अस्ति यत् सः प्रजाभ्यः संगृहीतं करं सहस्रगुणं वर्धयति स्म तेषां कल्याणार्थम् ।अस्मिन् विषये कविना सूर्यस्य उपमारूपेण प्रयोगः कृतः अस्ति । कविः कथयति, सूर्यः पृथिव्याः रसं संगृह्य भूमौ वर्षति सहस्रशधाराकारेण –

"प्रजानामेव भुत्यर्थं स ताभ्यो वलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः"॥ **(रघुवंशम् श्लोकः – १/१८)**

अर्थात् सूर्यः पृथिव्याः यत् गृह्णाति, तत् भिन्नरूपेण पृथिव्यां प्रत्यागच्छति। फलतः पृथिवी हरिता भवति । एते सूर्यवंशीयराजानः सूर्यसदृशाः अपि आसन् । प्रजाभ्यः कररूपेण यत् ग्रहणमकुर्वन् तदेव करप्रदायकान् प्रति ते प्रत्यर्पणमकुर्वन्। फलतः कोऽपि सर्वहारा न स्यात् । प्रत्येकस्य नागरिकस्य स्वतन्त्रतया जीवितुमधिकारः आसीत् । सःराजा कस्यापि शोषणेन स्वसाम्राज्यस्य समृद्धिं न कृतवान् अपितु प्रजानां हिताय धनस्य रक्षणं कृतवान् –'त्यागाय सम्भृतार्थानां........'। **(रघुवंशम् श्लोकः – १/७)**

**विश्लेषणम्:** भारतीयसंविधानस्य अनुच्छेदः २३ तः २४ पर्यन्तं शोषणं अपराधरूपेण निरूपयति, कालिदासेन च स्वकाव्ये सूर्यवंशीयराजानां चरित्रे तत् निपुणतया समावेशितम् अस्ति । अतः कोऽपि राजा स्वप्रजानां शोषणं न कृतवान् ।कविकृतौ प्रत्येकमनुष्यः समानरूपेण सर्वाधिकारान् भुङ्क्ते ।अतः एतत्प्रमाणितं यत्, संविधानस्य मौलिकाधिकारः कालिदासेनापि सुसंरक्षितः आसीत्।

**४) अभिज्ञानशकुन्तलम्:**

महाकवेः कालिदासस्य सप्तसंख्यकेषु नाटकेषु "अभिज्ञानशकुन्तलम्" इति नाटकमन्यतममस्ति। पुरुवंशप्रदीपेन दुष्यन्तेन सह स्वर्गनर्तकीमेनका-विश्वामित्रयोः औरसजातायाः कन्यायाः शकुन्तलायाः प्रणयकाहिनी एव अस्य नाटकस्य वर्णनीयविषयः। सप्ताङ्कसमन्विते अस्मिन् नाटके संविधानोल्लिखितः मानवाधिकारः कीदृशः सन्निविष्टः अस्ति तदत्र आलोचितम्।

क) नाटकस्य नायिका शकुन्तला विश्वामित्रस्यौरसेन मेनकायाः च गर्भे जाता परन्तु जन्मनः परमेव सा वलिका तस्याः जनन्या परित्यक्ता अभवत्। महर्षि कण्वेन सा सद्योजाता परमयत्नेन लालिता अभवत्। कण्व तस्याः जातकर्माण्यपि बैदिकरीत्यनुसारमकरोत्। तां कन्यां स्वकन्या मत्वा कण्वः तस्याः दुर्दैवप्रशमनार्थं सत्पात्रे सम्प्रदानार्थञ्च सोमतीर्थमपि गतः। तेन तु अस्पृश्यतामित्यादयः न प्राधान्यं प्राप्ताः ।

**विश्लेषणम्:** भारते बहवः जातीयाः निवसन्ति । अत्र प्रत्येकजातीयजनाः एकत्र निवसन्ति । क्षुद्रजातीयभेदानवज्ञाय जनाः परस्परं भ्रातृत्वबन्धनेन आवद्धाः सन् निवसन्ति । भारतीयसंविधानस्य अनुच्छेदः १४ तः १८ पर्यन्तं समानतायाः अधिकारस्य विषये वर्तते । भारतीयसंविधानस्य अनुच्छेदः १४ तः १८ पर्यन्तम् उक्तं यत्, जाति,धर्मः, लिंगं, भाषा, राज्यं च इति आधारेण कस्यापि नागरिकस्य विरुद्धं भेदभावः न करणीयः । अतः कालिदासः स्वकाव्ये कण्वेन मानवाधिकारस्य यत् चित्रं चित्रयति तत् भारतीयसंविधाने अपि उल्लिखितम् अस्ति।

ख) राजा दुष्यन्त क्षत्रियः परन्तु शकुन्तलायाः पालकपिता महर्षिः कण्वः ब्राह्मणः। पुनः शकुन्तलायाः जन्मदाता पिता महर्षिः विश्वामित्रः यद्यपि क्षत्रियः तथापि तपःप्रभावात् सः ब्रह्मत्वप्राप्तः अभवत्। तस्याः माता स्वर्गवेश्या। शकुन्तलायाः ईदृशं जन्मवृत्तान्तं ज्ञात्वाऽपि दुष्यन्तः तस्याः जातिविषये किञ्चिमात्रं चिन्तनं नाकरोत्। यद्यपि प्रथमे सः राजा, शकुन्तलां तपस्वीकन्या मत्वा क्षत्रियेन तेन तां प्रत्यासक्तिः असमीचीना इति चिन्तयति स्म तथापि दिनान्तरे सः शकुन्तलां प्रति दुर्निवाराकर्षणं नोपेक्षते स्म। एतदर्थं तेनोक्तम् – "अशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्"। **(१/२५)**

**विश्लेषणम्:** अत्र लक्ष्यणीयं यत्, यथा भारतीयसंविधाने जातिलिङादिवैषम्यं न्यायविरुद्धमिति उल्लिखितमस्ति तथैव तु कलिदासोऽपि वर्णवैषम्यं दूरीकृत्य अस्मिन्नाटके

मानवाधिकारं रक्षामकरोत् नारी-पुरुषयोश्च मेलनक्षेत्रं प्रस्तुतमकरोत्। सर्वोपरि नारीपुरुषयोर्हृदयाह्वानं स्वीकार्यं तच्च सर्वोत्कृष्टमानवाधिकारः इति कालिदासेन प्रतिष्ठितम्।

ग) विवाहिता कन्या पतिगृहे एव अधिकसम्मानीया । अधिकदिनं पितृगृहे तस्याः अपवादो भवेत्। यद्यपि महर्षिः कण्वः आश्रमवासी तथापि लोकाचारज्ञानं तस्मिन्नासीदित्यस्य प्रामाण्यमयं श्लोकः –

"अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा" ॥ **(४/२२)**

कन्या परस्य धनं, पितृगृहे सा परस्य सञ्चितं सम्पद्। मातापितृस्नेहाञ्चले सा सदा स्थातुं न शक्यते । यथासमये तस्याः नूतनजीवनस्य परिचयदानं मातापितृणां दायित्वम् अस्ति। अस्य लोकाचारस्य भारतीयसंस्कृत्या सह नैकट्यम अस्ति । अतः महर्षि कण्वः विदायकाले शकुन्तलाम् अवदत् यत्, पतिकुलस्य वृद्धानां सेवा कर्तव्यम्, सपत्न्या सह सखीरूपेण व्यवहारः करणीयम्, क्रोधितेऽपि पतिं प्रति दुर्व्यवहारमकर्त्यवम्, सौभाग्यगर्वमकरणीयम्, स्वजनान् प्रति दयाप्रदर्शनमुचितम् । एतस्मात् कण्वस्य लोकाचारज्ञानं सुविदितमस्ति।

नाटकस्य पञ्चमे कृतौ स्मृतिभ्रंशयुक्तः राजा शकुन्तलाम् अन्यपत्नीत्वेन तिरस्करोति, न परिचिनोति इति दृश्यते। शकुन्तला राज्ञः विवाहिता पत्नी आसीत् तथापि स्मृतिभ्रंशयुक्तः राजा शकुन्तलां स्वपत्नीत्वेन न ज्ञात्वाऽपि भोक्तुं शक्नोति स्म, किन्तु राज्ञा तत् न कृतं, सा शिक्षा सा च संस्कारः यत् राज्ञे आसीत् तथा च अयं संस्कारः वर्तमानेऽपि लक्ष्यते। यद्यपि प्रत्येकं नागरिकं सर्वान् अधिकारान् स्वतन्त्रतया भोक्तुं सौभाग्यं प्राप्नोति तथापि प्रत्येकः भारतीयः नागरिकः जन्मतः एताः सर्वाः भारतीयसंस्कृतीः अभ्यासं करोति तथा च एषः एव भारतीयः आदर्शः। भारतीयाः तान् अनिवार्यतया न अवलोकयन्ति स्म, ते तान् आदरपूर्वकं अवलोकयन्ति स्म।

**विश्लेषणम्:** एतानि सर्वाणि शिक्षाः, संस्कृतिः, शिष्टाचारः अद्यापि तत्कालीनवत् एव सन्ति। भारतीयसंविधानस्य अनुच्छेदः २९, ३० च अनुच्छेदे उक्तं यत् प्रत्येकं नागरिकं समानाधिकारं प्राप्नुयात्। कालिदासवर्णनायाम् मानवाधिकारोऽयं सम्यक् रक्षितः।

घ) राजा दुष्यन्तः मृगं अनुधावन् कणबेराश्रमस्य समीपम् आगत्य बैखानसस्य आह्वानेन आश्रमं प्रविष्टवान्। आश्रमप्रवेशात् पूर्वं रथं निवारयितुं सारथिं आदिष्टवान् यथा आश्रमवासिनां समस्या न भवेत् एवं चोक्तम्- "तपोवननिवासिनामुपरोशो मा भूत्। एतावत्येव रथं स्थापय यावदवतरामि'।**(प्रथमाङ्कः)** तपोवने सः राजबेशेन न प्रविष्टः। स विनयपूर्वकं सारथिं भूषणधनुषादिप्रदानेन आश्रमं प्रविष्टवान् । यद्यपि आश्रमः स्वराज्यान्तर्गतः अनेन कारणेन साडम्वरं स आश्रमं प्रविष्टुं शक्नोति स्म तथापि तेन तत् परित्यजति स्म । तपोबनस्य शान्तमृदुवातावरणे सः आश्रमवासिनामुपरि आधिपत्यं अकृत्वा सम्यक्केशेन प्रविष्टः, सर्वेभ्यश्च स्वतन्त्रजीवनस्य अधिकारं प्रदत्तवान्।

**विश्लेषणम्:** भारतीयसंविधानस्य स्वतन्त्रतायाः अधिकारे उक्तं यत् देशस्य कस्मिन् अपि भागे प्रत्येकस्य नागरिकस्य स्वेच्छया जीवितुं अधिकारः अस्ति तथा च तस्मिन् अधिकारे कोऽपि बाधां कर्तुं न शक्नोति। एतत् कालिदासस्य काव्ये अपि प्रतिबिम्बितम् अस्ति । अतः अस्मिन् काव्ये मानवाधिकारः पूर्णतया रक्षितः इति वक्तुं शक्यते।

**उपसंहारः**

समाजे राजनैतिक-आर्थिक-धार्मिक-शैक्षिक-समस्याः सन्ति । अतः मानवसभ्यता सततं सामाजिकसमस्यानां सम्मुखीभवति तथा च नागरिकाः एतैः सर्वैः समस्याभिः सह सम्बद्धाः सन्ति। अतः नागरिकाः सम्मुखीभूताभिः समस्याभिः सह मानवाधिकारस्य उल्लङ्घनं अपि कुर्वन्ति । संविधानं जनानां सुविधायै सामाजिकशान्तिव्यवस्थां च निर्वाहयितुम् लिखितम् अस्ति। विधिदृष्टौ सर्वेषां समानाधिकारः इति सिद्धान्तस्य स्थापनार्थं यथा मौलिकाधिकारः मौलिककर्तव्यं च लिखितम् अस्ति तथा मानवाधिकारायोगस्य स्थापना अपि कृता अस्ति। एतेषां अधिकारानां रक्षणं विधिप्रवर्तकानाम् कर्तव्यम् अस्ति । तथापि सर्वत्र समानरूपेण नियमाः न प्रवर्तन्ते । प्राचीनकालवत् अद्यत्वे अपि वर्णव्यवस्था प्रचलिता अस्ति। अधुनाऽपि समाजे रक्षकाः भक्षकाः च समानरूपेण विद्यन्ते। वर्तमानेऽपि निर्धनगृहस्थस्य बालकस्य बाल्यकाले पुस्तकानां स्थाने कृषिसामग्रीम् उद्धर्तुं भवति अथवा सः यन्त्रशलायां श्रमिकरूपेण गन्तव्यः भवति। इदानीमपि ग्रामेषु बालविवाहः प्रचलति । अतः समाजस्य नागरिकाः अवगताः स्युः चेत् एव मानवाधिकारस्य स्थापना भविष्यति, न तु विधिना ।

'वयं सर्वे सर्वेषां कृते, अस्माकं प्रत्येकं परस्य कृते' - यदि प्रत्येकः बालकः एतेन विचारेण वर्धते तथा च यदि एषः विचारः समाजे प्रतिबिम्बितः भवति तर्हि सर्वेषां अधिकारानां रक्षणं भविष्यति, नान्य पन्था विद्यते अयनाय।

**सहायकग्रन्थाः**

1. मेघदूतम् – श्रीसत्यनारायणचक्रवर्ती - संस्कृतपुस्तकभाण्डारः, कलिकाता

2. रघुबंशम् – श्रीजनेशरञ्जनभट्टाचार्यः - वि.एन्.पब्लिकेशन्-कलिकाता
3. अभिज्ञानशकुन्तलम्- श्रीसत्यनारायणचक्रवर्ती - संस्कृतपुस्तकभाण्डारः, कलिकाता
4. कालिदाससमग्रः -ज्योतिभूषणचाकी - कलिकाता